विदुलातो हस

विदग्ध मुख मंडन टीका

ताराचंद्र कवि

प्रदानार्थ
३०।५।६२

ॐनमोभगवते श्रीगोकुलेशपदपद्मभक्तेनताराभिधेनकविनाशि
वराजधान्यां विद्वत्कुलोपकृतयेक्रियतेस्फुटार्थाटीकाविदग्धमुखमंड
नसंज्ञकस्य १ विमत्सराणांविदुषांचितेटीकामयाकृता मुदंवितनुतां
नित्यमेषाविद्वन्मनोहरा २ येनकृतेऽस्मिन्काव्येसम्यग्ज्ञातेंमनोयदा
विज्ञाः विद्वन्मनोहराख्यांदृष्टुःयत्नंतदाकुरुते ३ इहग्रंथस्यकर्त्तानिर्वि
घ्नपरिसमाप्त्यर्थंकायिकवाचिकमानसिकपापापहारित्वरूपंस्वेष्टदेवता
प्रशंसात्मकंमंगलमाचरतीति काव्य सिद्धोषधानिभवदुःखमहागदानां

ॐनमोभगवते श्रीगोकुलेशपदपद्मभक्तेनताराभिधेनकविनाशि
वराजधान्यां विद्वत्कुलोपकृतयेक्रियतेस्फुटार्थाटीकाविदग्धमुखमंड
नसंज्ञकस्य १ विमत्सराणांविदुषांचितेटीकामयाकृता मुदावितनुतां
नित्यमेषाविद्वन्मनोहरा २ येनकृतेऽस्मिन्काव्यसम्यग्ज्ञातुंमनोयदा
विज्ञाः विद्वन्मनोहराख्यांद्रष्टुःयत्नंतदाकुरुते ३ इहग्रंथस्यकर्त्तानिर्वि
घ्नपरिसमाप्त्यर्थंकायिकवाचिकमानसिकपापापहारित्वरूपंस्वेष्टदेवता
प्रशंसात्मकंमंगलमाचरतीति काव्य सिद्धौषधानिभवदुःखमहागदानां

पुण्यात्मनां परमकर्णरसायनानि प्रक्षालनैकसलिलानि मनोमला
नां शौद्धोदनेः प्रवचनानि चिरं जयंति २ सिद्धौषधानीति शौद्धोदनेः शा
क्यमुनेः प्रवचनानि प्रकृष्टानि च तानि वचनानि चिरं चिरकालं जयंति स
र्वोत्कर्षेण वर्त्तंते इत्यर्थः शाक्यमुनिस्तु यः शाक्यसिंहः सर्वार्थः सि
द्धः शौद्धोदनिश्च सः इत्यमरः कीदृशानि प्रवचनानि भवदुःखमहागदानि
सिद्धौषधानि भवस्य संसारस्य जन्मनो दुःखान्येव महागदा रोगास्तेषां
सिद्धौषधानि औषधांतरसंयोगापेक्षारहितानीत्यर्थः भवः क्षेमेशसंसा
रसत्तासंज्ञाप्तिजन्मसु इति मेदिनिः रोगव्याधिगदामयाः महारोगास्तु देहजा

२

भवंति एतेन कायिकपापापहारित्वमुक्तं भवति पुनः कीदृशानि पुण्यात्म
नां परमकर्मरसायनानि पुण्यात्मनां परमानि उत्कृष्टानि च तानि कर्ण
ता योः रसायनानि पूतात्मनां श्रवणपुटपेयानीत्यर्थः शास्त्रग्राहित्वं कर्णद्वारो
भवति एतेन वाचनिकपापापहारित्वमुक्तं पुनः कीदृशानि मनोमलानां त्व
प्रक्षालनैकसलिलानि मनसि चित्ते मलं ये षां ते मनोमलाः मलिनचि
त्तास्तेषां प्रकर्षेण क्षालनं प्रक्षालनं तदर्थमति निर्मलीकरनार्थं एकानि
च तानि सलिलानि मुख्यजलानि जलं ताराक्षाररहितानीत्यर्थः एके मुख्या
न्यकेवलाइत्यमरः मनो निर्मलीकरणात् मानसिकपापापहारित्वमुक्तं

२

ननुश्लोकद्वये: स्वरूपादितत्कर्मप्रशंसादिकमनुरूपाकविस्तत्प्रवचन
प्रशंसांकथमुक्तवानित्युच्यते॰ महापुरुषाणांस्वरूपादिकंतत्क्रियादिकं
चसर्वमलौकिकत्वादद्भुतं॰ क्वाचित्कंचवचनंतुतथ्यमेव तदुक्तंभागवते
ईश्वराणांवचस्तथ्यंतथैवाचरितंक्वचित् एषांवचनंपथ्यमितिनीते:
एतेनमहाशयवाक्यपरिपालनेनसकलाभीष्टसिद्धिस्याचेतेति
भाव: २साधवोहृदयंमह्यमितिविष्णूक्तिंस्मृत्वाद्वितीयश्लोकार्द्धेनच
कवे:गिर:प्रस्तौति जयंतसंत:सुकृतैकभाजनंपरार्थसंपादनसद्व्रत
स्थिता: करस्थनीरोपमविश्वदर्शिनो जयंतिवैदग्ध्यभुव:कवेर्गिर:२

जयंतीति॰ सुकृतस्य पुण्यस्यैकं मुख्यं भाजनं पात्रं यथा स्यात्तथा संतः
साधवो जयंति कीदृशाः परार्थसंपादनसद्भूतस्थिताः सत्साधौ विद्य
माने चेत्यमरः कवेः पंडितस्य गिरो वाचो जयंति संख्यावान् पंडितः क
विः गीर्वाग्वाणी सरस्वतीत्यमरः कीदृशस्य कवेः करस्थनीरोपमवि
श्वदर्शिनः करे तिष्ठतीति करस्थः करस्थं च तत्र नीरं जलं च करस्थ
नीरस्य क्षरणभंगुरत्वात् उपमा यस्मिन् तत्करस्थनीरोपमं करस्थित
नीरोपमं विश्वं पश्यतीति करस्थनीरोपमविश्वदर्शी तस्य करस्थनी
रोपमविश्वदर्शिनः कीदृशो गिरः वेदाध्यमुवः विदग्धस्य चतुर

स्वभावोवैदग्ध्यः वैदग्ध्यात् भूरुत्पत्तिर्यस्यांताः चातुर्योत्पन्नाइ
त्यर्थः २ इदानींखलमुखेपरगुणकथनालसांजिह्वामालोक्यकविःसाशंकमु
त्प्रेक्षते आक्रांतेवमहोपलेनमुनिनासक्षेवउर्व्यासिसासातत्यंवतमुड्ढ्रींवाजंतुनानीते
तेवमूर्छीविषैःवद्धेवातंतुरज्जुभिःपरगुणान्वक्तुंनशक्तासतीजिह्वाखलोहसलाक
याखलुमुखेविद्धेवसंलक्ष्यते ३ आक्रांतेति खलुमुखेदुर्जनवदनेसतीविद्यमा
नापिजिह्वापरगुणान्परेषांगुणान्वक्तुंनशक्तानसमर्थाऽतः लोहशलाकया
विद्धेवसंलक्ष्यते मयेतिशेषः पिशुनोदुर्जनःखलः इत्यमरः किंवामहोपलेन
महापाषाणेनआक्रांतापाषाणप्रस्तरग्रावोपलाश्मानः इत्यमरः किंवाउर्वीस

सामुनिनाअधारभूतयाकस्यापिगुणानवाच्याइति किंवासततस्वभाव:
सातत्यंजन्तुनाजाड्यावतेतिखेदेमुद्रिता लाक्षाराक्षाजन्तुक्लीब इत्यमर:
किंवाविषै:हालाहलादिभिर्मूर्छांनीताप्रापिताकिंवा अतनुरज्जुभिर्बं
धातिष्टतियत:परेषांगुणान्वक्तुंकथयितुंनक्षमा ३ इहानेकेसत्यंसततमुप
कारिनिजप्रकृतिंकृतज्ञा:कुर्वंताजगतिनिवसंत्येवसुधिय: कियंतस्तेसंत:सुकृत
परिपाकप्रनयनोविनास्वार्थंयेषांभवतिपरकृत्यव्यसनिता ४ अधकनाक
वि:पुरुषेषुमध्यमाधमेषूत्तमभेदेनत्रैविध्यंप्रदर्शयन्नाह इहेति इहलोके
अनेकेकृतज्ञा:कृतंजानातीतिकृतज्ञा:अनेकेबहवोसततंउपकारिणिषु

रूपेउपकृतिंवस्तुपकारिंकुर्वंतो निवसतीतिसत्यं उपकारिषुयः साधुः
साधुत्वेतस्यकोगुणः इतिस्मरणात् तस्माद्देतेमध्यमाः जगतिसंसारेत्र्प्रनेके
सुधियोविद्वांसोनिवसंत्येवइतिसत्यं आत्मार्थीकोनुजीवतीतिस्मृतेः त
स्माद्देतेनिकृष्टाः येषांस्वार्थंविनापरकृत्यव्यसनिता अ्यसनमस्यास्तीति
व्यसनीव्यसनिनोर्भावः व्यसनितापरेषांकृत्यंपरकृत्यंपरकृत्यस्यव्यस
नितापरकृत्यव्यसनिताभवति तेतथाविधास्संतः सत्पुरुषाः कियं
तोविरलाः उक्तंच नीतौ साधवोनहिसर्वत्रचंदनंनवनेवने इति एकेसत्पु

रूपापरार्थघटकाः स्वार्थंयनित्यंज्ञेये इतिभर्तृहरिः कीदृशाः संतः सुकृतस्य
परिपाकेनिष्पन्नोप्रणयः प्रेमायेषांतेसुकृतपरिपाकप्रणयिनः प्रणयास्त्व
मीविश्रंभयाश्चप्रेमानइत्यमरः एतेउत्तमाः उक्ताः ४ बद्धांजलिंसममसज्ज
नसज्जनौतौवंदेनितांतकुटिलप्रगुणस्वभावौ एकंप्रियानिरसिसंधिततवे
रिभूतंद्वीत्यापरंपरमनिर्वृतिपात्रभूतं ५ परस्परगुणाः दोषानश्चनप्रशंसे
नगर्हयेदितिसंचिंत्यपूर्वोक्तौखलसज्जनौनमस्कुर्वन्नाह बद्धेति अहमं
जलिंबद्धा तोष्टवेक्तौअसज्जनौसमंतुल्यंनिर्विशेषमितियावत् वंदेनम

स्करोमि वंदिअन्निवानस्तुत्सो: कीदृशौ तौ नितांतं अत्यर्थं कुटिलो वक्र:
प गुणो आर्जवस्वभावो ययोस्ते आविधं कुटिलं भुग्नं वेल्लितं वक्रमित्य
पि अजावजिह्मप्रगुणा वित्यमर: उभयोरपि वंदनेप्यवस्थामाह एकमि
ति तयो: खलु सुजनयो: मध्ये एकं प्रथमं असज्जनं प्रियाभीत्या वंदे कीदृ
शमेकं निरभिसंधितं वैरिभूतं अभिसंधानं कर्त्तुमशक्यो यो वैरी शत्रु:
तत्त्रायं मद्दृष्टवत्सुखमेयोऽु: संधश्च उर्ज्जनो भवतीति मद्दृहरि: अप ५०
रं द्वितीयं सज्जनं प्रीत्या हर्षेण वंदे मुद्प्रीतिप्रमदो हर्षइत्यमर: की

ऽपरमं परमाचासौ निवृत्तिश्च परमनिवृत्ति परमनिर्वृतेः परमसुखस्य
पात्रभूतं स्थानरूपमित्यर्थः खलसुजनौ स्वभावतो दुःखसुखहेतू भव
तः इति भावः उक्तं च नीतौ परोद्वेगे परानंदे खलसज्जनयोर्द्वयोः स्वभा
व एव शरण्यं विषपीयूषयोरिव ५ किं मेथवा हतखलप्रणताव्रपि स्या
त्स स्वीकरोति सुजनो यदिमां गुणज्ञः चेंद्रेन चास्त्वचरितेन विकासितं स
त्संकोचितं भवति किं कुमुदं तमोभिः ६ अभिसंधाम शाकयश्चेतद्वदत
स्तदाभिवादनेन किं स्यादित्यत आह किमिति अथवेति पक्षांतरं

७ यदिमां सगुनज्ञः गुणान् जानातीति गुणज्ञः सुजनः साधुः स्वीकरो
तीति अंगीकरोति तदा हतखलप्रणतावपि ० हतश्चासौ खलश्च ह
तखलः हतखलस्य प्रणतिः हतखलप्रणतिः तस्यां हतखलस्य प्र
णतौ ०धिकृतावनमस्कारो ऽपि मम किं स्यात् अपि तु न किमपि तत्र दृ
ष्टांतमाह यथा चारुचरितेन चारु हृद्यं चरितं वृत्तं यस्य सः चारुचरि
तः तेन चारुचरितेन चंद्रेण विकाशितं विकासिभावं प्रापितं कु
मुदं कैरवं इंदीवरं च नीले ऽस्मिन् सिते कुमुद कैरव इत्यमरः

तमोभिरंधकारैः संकोचितं किं न वति अपितु न भवत्येव तथा यदि
गुणज्ञो मत्कृतकाव्यस्य स्वीयकारं करोति तदा दुर्जनानंगीकारे
मम कांक्षा तिरितिभावः ६ श्रीत्येसतां तदनुभावतावसादः संत्यज्य
गूढरचनां प्रतिभानुरूपं स्त्रिष्वावबोधकरणक्षमभीप्सितार्थंवि
द्ये विदग्धमुखमंडनमप्रपंचं ७ सुजनस्वीकारवलमवलंब्य कविग्रं
थस्याभिधानं प्रगटयन्नाह श्रीत्येसतामिति अहं विदग्धमुखमंडनं
काव्यं वक्ष्ये किंकृत्वा गूढरचनां दुर्ज्ञेयरचनां संत्यज्य प्रतिभानुरूपं

वुद्धेरुत्कर्षस्तदनुरूपंयथास्यात्तथावक्ष्यते किमर्थंसितांशीत्येसाधूनांपरितो
षाय कीदृशोहं तदनुभावगतावसाद:येषांसाधूनांअनुभावोनुग्रहस्तद
नुभाव:तदनुभावेनगत:अवसादोविषादोयस्यस:कीदृशंविदग्धमुख
मंडनंच्छिष्यावबोधकरणक्षमंच्छिष्यंशीघ्रंअवबोध:सम्यग्ज्ञानंतत्करण
क्षमंतत्संपादनसमर्थंपुन:कीदृशंईप्सितार्थईप्सित:इष्ट:अर्थोयस्मिं
स्तत्ईप्सितार्थमितिपाठेवांछितार्थमित्यर्थ:पुन:कीदृशंअप्रपंचंनवि
द्यतेप्रपंचोविस्तारोयस्मिंस्तत्अपंचमविस्तरमित्यर्थ:विपर्यासेच
विस्तारेप्रपंचइत्यमर:७यद्यस्तिसभामध्येस्थातुंवक्तुंमनस्तदास्तु

धियः तांबूलमिव गृहीत्वा विदग्धमुखमंडनं विशंतु ८ ८ अधुना
ग्रंथकारोयं ग्रंथप्रचारार्थं साभिप्रायमाह यद्वीति विशंतु विश प्रवेशने
उपविशंतेत्यर्थः अन्यत्सुगमं ८ कविरग्रे वक्ष्यमाणान् प्रमेयाननुक्रा
मति प्राकुर्व्यस्तं समस्तं च द्विव्यस्तं द्विसमस्तकं तथा व्यस्तसमस्तं च द्वि
व्यस्तकसमस्तकं ९ प्राकुरिति तद्विद इत्यर्थः व्यस्तो दीनां लक्षणम
ग्रे वक्ष्यति ९ १० ११ सद्भिः समस्तकव्यस्तमेकालापं प्रभिन्नकं
भेद्यभेदकमोजस्विसालंकारं सकौतुकं १० प्रश्नोत्तरं समं प्रश्न
भग्नोत्तरं तथा आदिमध्योत्तराख्ये द्वे अंतोत्तरम् अतः परं ११
म

कथिताप्रकृतिश्चैवविषमंवृत्तनामकंनामाख्यातंचताश्चर्यचि
सौत्रंशाब्दीयशास्त्रजं २२ वर्णोत्तरंवाक्योत्तरंपादोत्तरंपादो
त्तरंचेतिद्वे २२ शाब्दीयंशास्त्रजं २३ चेतिद्वे २४ २५ वर्ण
वाक्योत्तरेतद्वत्श्लोकोत्तरमतः परंखंडपादोत्तरंचक्रंपद्मकाकपदंत
था २३ गोमूत्रीसर्वतोभद्रीगतप्रत्यागतवक्रः वर्द्धमानाक्षरंतद्धीय
मानाक्षरंतथा २४ शृंखलांनागपाशंचचित्रंसंशुद्धमेवच प्रहेलिका
तथाहृद्यंकालसारादिवर्णितं २५ अजमारादिकंगूढंपदपादार्थगूढ
कंस्तुतिनिंदातथाव्यर्थसलापकुतिविंद्रुमतं २६ पदगूढंअर्थगूढं

पादगूढं २

चेतित्रयं अपकृतिशब्देनसह विंदुमत शब्दमित्यर्थः २६ २७ २८
क्रियाकारकसंबंधगुणाभ्यामंत्रितस्यच गुणंतथासमासस्यलिंगस्य
वचनस्यच २७ मात्राविंदुविसर्गाणांच्युतकान्यस्वरस्यच स्थानत्वं
जनयोश्चापिच्युतदत्ताक्षरंतथा २८ इत्युद्देशकं मतः शब्दंपदवि
भागेनकेवलेनैवव्यज्यते विंदुर्व्यस्तसमस्तंयत्समुदायेन शब्द्यते २९
पूजायां किंपदं शोकमस्तनं को विभक्त्युरः कं आयुधतयाख्यातः
बलंवासुरविद्विषः ३० सुनासीरः अथटीका तत्रतावदेकेनश्लो
केनव्यस्तसमस्तयोर्लक्षणमाह शब्दमिति विभक्त्यंतंपदंकेव लं

लेनपादविभागेपदानांविभागः पदविभागेनयत्पृष्टंतं प्रश्नंप्रश्नविदो
व्यस्तंविदुर्जानीयुः विदज्ञानेसमुदायेनपृच्छ्यतेतंप्रश्नंसमस्तसंज्ञं
विदुः १५ तत्रतावत्तस्योदाहरणमाह पूजायामिति कश्चनकम
पि विद्वांसोपदविभागेनपृच्छति पूजायांकिंपदंप्रोक्तमित्येकप्रश्नः
अस्तनंस्तोभ्यांरहितं उरोवक्षः कोविभक्तेति इति द्वितीयःप्रश्नः पृत्नं
वासुरविद्वेषोवल्लिभङ्गस्यआयुधमस्त्रंतस्यभावः आयुधतातया
आयुधतयाख्यातोविश्रुतः इतितृतीयःप्रश्नः एतत्त्रयाणांप्रश्ना
नांप्रत्युत्तरं सुनासीरइतीड्वाची तत्रपदविभागः सुनासीरः सुइ

त्पर्थेऽर्घ्यांपूजावाची पूजनेस्वतीत्यमरः नाप्तुमान्नृशाब्दस्यनाइ
त्तिरूपं सोपरे सीरो हलं ग्रलंवघ्नू इत्यमरः हाल फालः वहः सीरइ
त्तिविक्रमादित्यः एवंपदविभागेनैवप्रत्युत्तरंत्रयंदत्तमित्यर्थः २०
कोऽदुराढ्यस्यमोहायकाप्रियासुरविद्विषः पदप्रश्नवितर्केकिंकोदं
तखद्भूषणं २१ रामानुरागः इतिव्यस्तजातिः व्यस्तप्रश्नस्याद्विती
यमुदाहरणमाह कंइति दुःखेनआढ्योदुराढ्यस्तस्यतस्यदुराढ्यस्य
निर्धनस्यमोहायअज्ञानायकः इतिप्रश्नेप्रत्युत्तरंरामानुरागइत्यत्र

२२

पदविभागः रा मा नु रागः इति पद चतुष्टयं तत्र प्रथम प्रश्नस्योत्तरं

राः वित्तं रैश्राद्धस्पराइतिसोपरेरूपं राः पुंसिस्वर्णविन्नयोरितिमेदिनिः

पुनः पृछ्यति सुरस्यविद्वड् सुरविद्वट्‌तस्यमुर विद्वषोमुरारेः प्रिया

का इतिपृष्टे प्रत्युत्तरंमालक्ष्मी: इंदिरालोकमाता मेईत्यमरः प्रश्न

स्यवितर्कः ऊहातोयोहः प्रश्नवितर्कः तस्मिन्प्रश्नावितर्केकिं पद

मितिपृष्टे प्रत्युत्तरं नुइतिप्रश्नायांविकल्पेचेत्यमरः दंतछदो

अधरः ओष्टाधरौतुरदनछदौ दृसनेत्यमरः दंतछदस्याधरस्य

भूषणं अलंकारः कः इतिपृष्टेप्रत्युत्तरं रागः रक्तिमनानाहलादेः

एवंरीत्यान्यत्रापिज्ञेयं २१ इतिव्यस्तजातिः २२ अपिसेवितान्द्वि
जिह्वैःकदापिकेयांतिनविकारंविछिद्यमानतरवःस्वगुणै
रधिकंविराजंते २२ मलयतरवः इदानींसमस्तश्लेषस्योदा
हरणद्वयंशार्म्यामाह अपीति द्विजिह्वैःसर्पैःसेविता अपिक
दापिकस्मिन्नपिकाले०केविकारंविकृतिंनयांति याश्चापणे
छेदनेत्रोटनघर्षणादिभिर्विछिद्यमानानतनुःशरीरंयेषांते
विछिद्यमानततनवःस्वगुणैःशीरम्यशैत्यादिभिरधिकंरधिकं
यथास्यात्तथाविराजंतेदीप्यंतेराजदीप्तौ द्विजिह्वौसर्पस्व

चक्रवित्यमरः एवंष्टेष्टेप्रत्युत्तरं मलयतरवः अर्थाच्चंदनावि २२
अनिभृतकोकिलनिस्वनमुखरितसहकारकाननः पुंसां कोभव
तिहृदयहारी मधुकरझंकारिकंकेल्लिः २३ मधुसमयः अनि
भृत्येति पुंसां हृदयहारीचित्तहारकः कोभवतीतिष्टेष्टेप्रत्युत्तरंम
धुसमयः मधोर्वसंतस्यसमयःकालः दैत्येचैत्रेवसंतेचमधुःपुंसिम
धुद्रुमः इतिमेदिनिः कीदृशोमधुसमयः अनिभृता अविनीता
अर्थान्मत्तयेकोकिलाः पिकास्तेषां निस्वनैः कूजितैःमुखरितानि
मुखरीकृतानिसहकारकाननानिआम्रवनानियत्रसः अनि
भृताविनीतप्रमिताःसमाः इत्यमरः सहकारोतिसौरभइतिच पुनः

कीदृशः मधुकरैः भ्रमरैः झंकारिणः शब्दायमानाः कंकेल्लय:
अशोकतरवो यत्र सः कंकेल्लिर्वंजुलोऽशोक इति हलायुधः २२
इति समस्तजातिः २३ समस्तजातिः व्यस्तंसमथवा समासप
दभंगतः द्विःष्टष्टंयत्तदेवंस्यात् द्विर्व्यस्तंद्विःसमस्तकं २४ इ
दानीं द्विर्व्यस्तद्विःसमस्तयोर्जात्योर्लक्षणमाह व्यस्तमिति
समासस्यच पदानांच भंगात्खंडनं तरंगो वा समासकल्पनांत
रंग इति यावत् तस्मात्समासपदभंगतः यत्र व्यस्तं प्रयुक्तं
व्यस्तप्रस्तरीत्या द्विष्टष्टं द्विवारंष्टष्टं तदेव द्विर्व्यस्तसंज्ञकं स्यात्

अथवायत्समस्तंप्रागुक्तंसमस्तप्रश्नइत्यासमासपदभंगतोद्वि
वारंपृष्टंतद्देवद्विःसमस्तसंज्ञकंस्यादित्यर्थःतदेवतदुदाहरन
द्वयेस्पष्टीकृतंकविना। तद्यथा कालीचासौकापालिकश्चकालि
कापालिकस्तस्यमठःकालिकापालिकमठइत्यत्रकर्मधार
यषष्ठीतत्पुरुषेव्यस्तप्रश्नइत्याकालिका॰अपालिकमठइ
त्येकःसमासःपदभंगःपुनःकालि कापालिकमठइत्यमरः
समासपदपदभंगोद्विःपृष्टत्वाद्द्विर्व्यस्तसंज्ञंउक्तं एवंनवारित
अवारितइत्यत्रनञ्तत्पुरुषेअवारितोरणेइत्येकःसमास
पदभंगः रणे अवारितइत्यमरःसमासपदभंगोद्विः१९ १०३

त्वाद्विर्व्यस्तसंज्ञ: एवंसमस्त१९रीत्या विश्ववरश्च आलोचनकु
लीचद्वराचेत्येक: समासपदभंगो द्वंद्वे विवरेप्वासीलीनाकुली
रायासुताइत्यमर: समासपदभंगो द्वि: १९ त्वाद्धि: समस्तसंज्ञ:
प्रश्न: एवंद्वितीयोदाहरणेपिसमस्तप्रश्नरीत्याद्वि: १९ त्वात्
द्वि: समस्तसंज्ञोज्ञेय: २४ वर्षासुकाभवतिनिर्मधुकीदृगज
शेषंविभर्त्तिवसुधासहितंकएक: प्रामंत्रयस्वधरणीधरनाथ
पुत्रीकोत्रास्थिभस्मनिचितांगजनाश्रय: स्यात् २५ कालिका
पालिकमर्व: २५ तयोर्द्विर्व्यस्तद्वि: समस्तप्रश्नयोस्तावत्द्वि

र्यस्तप्रश्नस्याद्यमुदाहरणमाह वर्षास्विति वर्षासुप्रावृट्कालेव
काभवंतीतिपृष्टेप्रत्युत्तरं कालिकामेघजालमित्यर्थः मेघजालेपि
कालिकेत्यमरः स्त्रियांप्रावृट्स्त्रियांभूम्निवर्षाइतिच निर्मधुमधु
हीनमजंकीदृगितिपृष्टे प्रत्युत्तरं अपालि अपगताअलयोभ्रम
रायस्मिन्नतत् कः एकोमुख्यः वसुधासहितंदृक्षीयुक्तंशेषंनागवि
शेषविभर्त्तिधरतीतिपृष्टेप्रत्युत्तरं कमठकूर्मः तदेवोत्तरं पुनः
पृच्छति धरनीधरनाथस्यहिमवतःपुत्रीमामंत्रयस्व आकार्यस्वेति
पृष्टे प्रत्युत्तरं कालिहेहैमवति० कालीहैमवतीश्वरीत्यमरः

अत्रलोकेअस्थिभस्माभिर्निचितानिभ्यातान्यंगानियेषांतेतादृशा
श्चतेजनाश्च अस्थिभस्मनिचितांगजनास्तेषामाश्रयः कः स्या
दितिपृष्टेप्रत्युत्तरं कापालिकमठः कापालिकस्यखल्वाटस्य
मठः शिष्यादिनिवासस्थानंमठःछात्रादिनिलयइत्यमरः २५
कीदृशंवदमरुस्थलंमतंद्वारिकुरिकुत्रसतिभूषणंभवेत् ब्रूहि
कांतसुभटःसुकार्मुकः कीदृशोभवतिकुत्रविद्विषं। २६ अवारि
तोरणे २६ द्विर्व्यस्तप्रश्नस्यद्वितीयोदाहरणमाह कीदृशमिति हे
कांत सुंदरमरुस्थलंधन्वदेशः कीदृशमितिपृष्टेप्रत्युत्तरं अवारि

न विद्यते जलं यत्र तत्समानौ मरुधन्वानावित्यमरः ॥ हारि॰ अर्थगृहस्य
बहिर्द्वारं कुत्र सति कस्मिन् विद्यमाने भूषणं भवेत् प्रत्युत्तरं तोरणे
आम्रादिपल्लवकृतविताने तोरणोऽस्त्री बहिर्द्वारमित्यमरः ॥ पुनः पृ
च्छति सकार्मुकः सधनुः सुभटो योधा विद्विषां शत्रूणां कुत्र कीदृशो भव
ति ब्रूहि प्रत्युत्तरं रणे अवारितः संग्रामे वारितुमशक्यः भटा योधाश्च यो
द्धा इत्यमरः ॥ अथ स्त्रियं धनुश्चापो धन्वा शरासनकोदंडकार्मुकमि
ति च २६ इति द्विर्व्यस्तजातिः । द्विर्व्यस्तजातिः । पद्मिश्रेष्ठसखीविकृ
सुराबाच्याः कथं वद ज्येष्ठे मासि गताः शोषं कीदृशोऽल्पजला भुवः २७

विवरालीनकुलीराः इदानीं द्विःसमस्तप्रश्नस्याद्यमुदाहरणमाह

पक्षीति पक्षी च श्रेष्ठश्च सखी च वक्रश्च सुराश्च ताः कथं वक्तव्या

इति पृष्टे प्रत्युत्तरं विवरालीनाकुलीराः विपक्षी विविष्करपतत्र

यः इत्यमरः वरः श्रेष्ठः आली सखी नकुलो वक्रः स्त्रियां नकु

ली इरा सुरा आलीः सखी वयस्येत्यमरः विपुले नकुले विष्णो

वक्रः स्यात्त्रिंगले त्रिष्विति इरा भुवाक्सुराप्सु स्यादिति च प्र

नः प्रश्नति ज्येष्ठे मासि सरोषं गताः संशुष्काः अल्प उर्वरितं जलं या

सुताः अल्पजलाभूम्यः कीदृशो वदेति पृष्टे प्रत्युत्तरं तदेव विवरा

१९

लीनकुलीराइतिविवरेषुविलेषुआलीनाःसमंतान्निमग्नाः कर्कटा

यासुताः स्यात्कुलीरःकर्कटइत्यमरः २७। विश्वंभराप्रलंवघ्न

व्रीहिमानुषसंयतः कथंवाच्याभवंत्येते दिनादौ विकटांतिकः २८

कुवलयवनराजयः २८ द्विःसमस्तस्योदाहरणांतरमाह विश्वं

कुवलयवनराजयः २८ द्विःसमस्तस्योदाहरणांतरमाह विश्वं

भरेति कश्चनपृच्छति विश्वंभराप्रलंवघ्नव्रीहिमानुषसंयतः वि

श्वंभरापृथ्वीप्रलंवघ्नोवलभद्रःव्रीहिःप्रथदित्रयवःव्रीहिसामा

न्यधान्येस्यादशुधान्यंचपुंसायामितिमेदिनि मानुषोनरःसंय

तयुद्धंच एताकथंवाच्याःभवंतीतिपृष्टेप्रत्युत्तरं कुवलयवनरा

जयः पृथ्वीगोत्राकुःपृथिवीत्यमरःवलःसंकर्षणःसीरपाणिः

२६

कालिंदीभेदनोद्धलः यवः शितशूकोन्नविशेषः शितशूकयवौ समावि
त्यमरः नरो मानुषः आजिसमितिः स्त्रियः संजित्समित्याजिः सीमेत्युधु
इत्यमरः पुनः पृच्छति दिनादौ प्रातः कालेका विकशंति इति शेषे वृत्तु
त्तरं तदेव कुवलयवनराजयः कुवलयानामुत्पलानां वनानि तेषां रा
जयो लेखाः स्यादुत्पलं कुवलयमित्यमरः लेखा तु राजयः इत्यपति २८
द्विः समस्तजातिः २८ पृष्टंपदविभागेसमुदायेन यद्भवेत् विदुर्मस्तसम
स्तं तदुभयार्थप्रदर्शनात् २९ का प्रियेन रहिता २९ इदानीं व्यस्तसमस्त
स्पलक्षणमाह पृष्टमिति यतः पूर्वोक्तिरीत्या पदविभागेन पृष्टं पश्चात्समु

दायेनस्पष्टं भवेत् तदुभयार्थप्रदर्शनात् उभयोर्व्यस्तसमस्तप्रश्नयोरर्थप्रदर्श
नं उभयार्थप्रदर्शनं तस्मात्० तस्मात् व्यस्तसमस्तं व्यस्तसमस्तसंज्ञकं प्र
श्नं विदुः तद्विद इति शेषः २९ वरांगणा धाम्नि केन तनयेन नंदिता की
दृशेन पुरुषेण पक्षिणां वंधनं समभिलष्यते सदा ३०। शाकुंतला भरतेन।
व्यस्तसमस्तप्रश्नस्य प्रथममुदाहरणं तावदाह केति प्रियेण र
हिता भर्त्रा हीना का वरांगणा कामिनी धाम्नि गृहे केन तनयेन पुत्रेण नंदि
ता सुखिता जातेति शिष्टः प्रत्युत्तरं शाकुंतला भरतेन शाकुंतला राज्ञी दुष्यंत
नाम्ना राजा रहिता गृहे पितुर्गृहे भरतेन भरतनाम्ना पुत्रेण नंदिता जाता

गृहदेहत्विट्त्रभावाधामानीत्यमरः पुनः पृच्छति सदा सर्वस्मिन्का
लेन कीदृशो भपुरुषे पक्षिणां शाकुंतानां वंधनं समभिलष्यते वां
छा क्रियते प्रत्युत्तरं शाकुंतलाभरतेन शाकुंतानां पक्षिणां लाभः
शाकुंतलाभः तत्ररतेन तत्परेन शाकुंति पक्षि शाकुंतानि शाकुंत शा
कुंन्तद्विजा इत्यमरः ३० कीदृशं हृदयहारि क्रूजितं कः शाखायां शाखि
भूपतेर्मतः कस्तवास्ति विपिने भयाकुलः कीदृशाश्च न भवेन्निशा
करः ३१ कलंकविराहितः ३२ अस्त समस्त प्रश्नस्य द्वितीयमुदाहरण
माह कीदृशामिति कश्चन राजपुरुषः कमपि राजानं पृच्छति हे राजन्

हृदयहारि हृदयंगमं कूजितं मधुरध्वनिविशेषः कीदृशामितिपृष्टे
प्रत्युत्तरं कलं अस्फुटमधुरध्वनिः ध्वनौतुमधुरास्फोटेकलंइत्य
मरः पुनःपृच्छति यशासि कीर्त्तौर्भूपतेः पृथ्वीपतेः कः सखासुन्म
तः इतिपृष्टे प्रत्युत्तरं कविपंडितः संख्यावान्पंडितः कविरित्य
मरः पुनःपृच्छति तव विपिने कानने भयाकुलः भयाविह्वलः
कोस्तीतिपृष्टे प्रत्युत्तरं अहितशत्रुः विपिनकाननंवनमित्यमरः
पुनःपृच्छति कीदृशाश्च निशाकरश्चंद्रोनभवेदितिपृष्टे प्रत्युत्तरं
कलंकविरहितः कलंकं केनलांछनेन विरहितं विशेषेनरहि

तोनभवेदिति कल्नंकांको त्नांखनंचेत्समरः इतिव्यस्तसमस्त
जातिः ३१ द्विर्व्यस्तमेवयत्पृष्टंसमुदायेनयन्नवेतरत्रिधाभिन्नं
देवोक्तंद्विर्व्यस्तकसमस्तकं ३२ कोत्रांकरस्यवलयावृपयोधरः
कःकीदृगपरस्यनियतंवशामेतिभूपःसंबोधयोरगपतिर्विजयी
चकीदृग्युधिष्ठिरोहिभवेद्वदकीदृशाश्व ३३ प्रहीनाद्गतनवः ३३
समस्तकंनामप्रश्नमुक्तंकंविशिनष्टिशेषः ३२ तावदेतस्यप्रश्न
मुदाहरणमाह कांविति शंकरस्यवलयौकौ इतिपृष्टेप्रत्युत्तरं
अहीसर्प्पौवलयःप्रकोष्ठाभरणंकंकणंवलयौस्त्रियामित्यमरः
इदानींद्विर्व्यस्तसमस्तप्रश्नस्यलक्षणमाह द्विर्व्यस्तमिति यत्पूर्वंद्विर्व्यस्तंपृष्टंपश्चा
त्तयत्समुदायेनयत्पृष्टंभवेत् एवंत्रिधाभिन्नंबारत्रयंपृष्टंतदेवप्रश्नंद्विर्व्यस्तकसम

पुनः पृछति अपयोधरः अस्तनः कः प्रत्युत्तरं नाभुमानस्तन
मेघोपयोधरो नियतंनिश्चितं कीदृक् भूपः परस्यान्यस्यवशंअ
धीनतामेति गछति प्रत्युत्तरं दत्तनयः नयः नीतिर्यस्मात् नीतिर
हितमित्यर्थः पुनः पृछति उरगपतिं सर्प्पराजानं संवोधयति पृष्टे
प्रत्युत्तरं हे अहीनवासुके सर्प्पराजस्त्वासुकिः इनः सूर्यश्च भो
राजेसमरः चपुनः विजयी कीदृक् प्रत्युत्तरं अदत्तनयः समु
दितनयः चपुनरर्थेहि [illegible]तावधारणे दुर्योधनकुरुराजः की
दृशोनभवेदेव वेदेतिपृष्टे प्रत्युत्तरं अहीनादत्तनयः हीनाद्द
स्पांधस्पतनयः हीनाद्दत्तनयः नहीनाद्दत्तनयः अहीना

द्यतनयः सनेत्रस्य पुत्रोऽयं धनो न भवेदेव ३३ कोमोहायकुशी
श्वरस्य विहितः संबोधनीयो गुरुः क्रोधाश्रां विरलः केऽत्नो नव घनः
किंवन्न कीदृक्कु द्विजः ३४ कारवावचनं न भवेदतिशायं डः खाद्य
कीदृक्कुखलः को विघ्नाधिपतिमनो भवसमो मूर्स्याभवान् की
दृशः ३५ राजीवसन्निभवदनः इति द्विव्यस्तसमस्तजातिः।
व्यस्तसमस्तजातेरुदाहरणांतरमाह कइति कुरीश्वरस्य डः खेनई
श्वरः कुरीश्वरः तस्य दरिद्रस्य मोहायाज्ञानायकः विहितः इति पृष्टे
प्रत्युत्तरं राः वित्तं पुनः पृच्छति गुरुः संबोधनीयः कथमित्यध्याहारः ४०

प्रत्युत्तरं हेजीवेतिवचसाऽपुनः पृच्छति कलौकलियुगेधात्र्यां
पृथिव्यांविरलः कियान्वकः प्रत्युत्तरंसत्सुधीसत्सुधीः कोवि
दोबुधेत्यमरः धात्रीचधातकीप्रोक्ताधात्रीचामलकीमताधा
त्रीवसुंधराज्ञेयाधात्रीस्यात्स्तनपायनीतिनानार्थः नवघनः
नूतनमेघः कियत् किमिवेति किंवत् वत् प्रत्ययस्तुल्यार्थे प्र
त्युत्तरं हस्तवत् हस्तः कुंजरस्तद्वत्स्यामइत्यर्थः कुंजरोवारणः
करीइभः स्तंबेरमः पद्मीत्यमरः कीदृक्कुपुरुषो द्विजोनब्राह्म
णोनभवतिप्रत्युत्तरं न० प्र० विष्णुस्तस्मादन्योऽनोविष्णुर

हितोद्विजोनभवत्येव अनइति अनश्वरइतिसूत्रेणनञोः ना
देशः अश्वादन्योऽनश्वः इतिवत् ब्राह्मणोमामकीतनुरिति
वचनात् अकारोवासुदेवःस्यादित्येकाक्षरकोषः तेषांवचनं
किंराजीलिषा कीदृक्रखलः अतिशयंदुःखायभवेत् प्रत्युत्तरंभवेत्
वसत् निकटेवसत्सत्विघ्नाधिपतिर्गणपतिः कः प्रत्युत्तरं त्वंभव
गजमुखः मनोभवेनकामेनसमः सर्वांगशरीरेणभवान्कीदृशः
प्रत्युत्तरः राजीवसन्निभवदनः राजीवेनकमलेनसन्निभंतुल्यंवद
नंयस्यसः द्विर्व्यस्तसमस्तजातिः २५ द्विसमस्तंयदापृष्टंव्यस्तकं

मेषुनर्भवेत् तद्भिःसमस्तकंप्रस्तंकथितंप्रश्नपंडितैः ३६ कीदृक्त्वः
सकलजनोभवेत्सुराज्ञः कालोविदितइत्यंधकारहेतुःकःश्रेयान्
कुमुदवनस्यकोविनिहंतिभ्रातृभ्रंवदशिरसाजितस्त्वयाकः ३७
विधुरविरहितः।३७।भिःसमस्तैर्विन्यस्तप्रश्नस्यलक्षणमाहयदा
पूर्वैर्भिःसमस्तैर्वारद्वयंपृष्टंपुनः व्यस्तकेनरीत्यायत्पृष्टंभवेत् त
त् भिःसमस्तकव्यस्तंनामप्रश्नंप्रश्नविद्भिःकथितं ३६।इदानीमेव
तस्योदाहरणमाह शोभनोराजासुराजातस्यसुराज्ञःसकलजनःस
मस्तलोकःकीदृक्शोभवेदितिपृष्टे प्रत्युत्तरं विधुरविरहितः विधु
रेणवियोगजदुःखेनविरहितोहीनः विधुरंधुप्रविश्लेषइत्यमरः।

इहलोके: कालः अंधकारस्य हेतुः कारणं विदितः प्रसिद्धः प्रत्युत्तरं
तदेव दिनकरविरहितः विकश्चंद्रः रविः सूर्यस्तापैरहितः कमु
दवनस्य प्रेयान् कः प्रत्युत्तरं विकश्चंद्रः विकः सुधांशुः शुभ्रांशुरित्य
मरः शास्त्रं वैरिणं शिरसा को निहंति वदेति पृष्टे प्रत्युत्तरं अवि
मेषः भाति मोधा तजधिषावित्यमरः अविशब्दोरवौमेषेपर्वतेपि
निगद्यते इत्यनेकार्थध्वनिमंजरी हेराजन् त्वया कः जितः प्रत्युत्तरं
अहितः शत्रुः द्विद्विपक्षाहितामित्रदस्युः शात्रवः शात्रवः इत्यमरः ३७

संग्रामेस्फुरदसिनाहतास्त्वयाकेकेदुःखंवृतनिरयेनरस्यकुर्युः
कस्मिन्नुद्भवतिकदापिनैवस्तोमरख्याताःकेजगतिमहालघुत्व
भावः ३८ नरकरेणवः ।द्विसमस्तकव्यस्तजातिः ३८ द्विसमस्त
व्यस्तप्रश्नस्यद्वितीयमुदाहरणमाह संग्रामेति कश्चनरः कमपि
खड्ग॰हस्तंगृह्णाति स्फुरद्रूपः असिः खड्गोयस्यसः स्फुरदसि
स्तेनस्फुरदसिनात्वयासंग्रामेयुद्धेकेहताइतिपृष्टे प्रत्युत्तरं
नरकरेणवः नरकस्यनरकभूमेःरेणवःपांशवःरेणुर्द्वयोःस्त्रियां
धूलिःपांशुर्नानद्वयोरजइत्यमरः कदापिकस्मिन्नपिकाले

कस्मिन्नंगे लोमः तनूरुहं नैव उद्भवति नैवोत्पद्यते प्रत्युत्तरं न
खकरे नखस्य मनुष्यस्य करे हस्ते तनूरुहं रोम लोमेत्यमरः जग
ति संसारे महालघुकत्वभाजः के ख्याताः महालघोर्भावो महालघुत्वं महा
लघुत्वं भजतीति महालघुत्वभाजः के प्रत्युत्तरं अणवः परमाणवः।
स्त्रियां मात्रा त्रुटिः पुंसि लवलेशकणाणव इत्यमरः ३८ इति द्विः स
मस्तकव्यस्तजातिः ३८ पदत्रयस्मिन्प्रश्ने एकश्रुत्या एकोत्तरेण
भिन्नार्थप्रतिपादकं वचः द्विसमस्तस्य प्रभेदं वदति प्रश्नं एका
लापकसंज्ञं विदुः ३९।४ एकश्रुत्या वचो यत्र भिन्नार्थप्रतिपादकं
प्रभेदं द्विः समस्तस्य तमेकालापकं विदुः ३९।४

कीदृशी निरयभूरनेकधासेव्यते परमपापकर्मभि: प्रेतराक्षस
पिशाचसेविता कीदृशी च पितृकाननस्थली ४० नरकपालनपा
चिता ४० अस्योदाहरणद्वयमुक्तश्लोकद्वयेनाह कीदृशीति कीदृ
शी निरयभू: नरकभूमि: अनेकप्रकार इति अनेकप्रकार इ
ति अनेकधा: परमपापकर्मभि: सेव्यते प्रस्तुत्तरं नरकपाल
पाचिता नराणां पालारक्षकास्तै: रचिता कृता च पुनरर्थे प्रेतरा
क्षसपिशाचै: सेविता पितृकाननस्थली प्रेतभूमि: कीदृशी
प्रस्तुत्तरं नरकपालपाचिता नराणां कपालै: रचिता कृता ४०

केशरद्रुमतलेषुसंस्थिता कीदृशोभवतिमत्तकुंजरः तत्वतोशिवभ
वेत्सलक्षणैरर्जुनिःसमितिकीदृशोभवेत् ४२दानवकुलरहितः।
एकालापकजातिः४२केशरोवकुलद्रुमःकेशरद्रुमतलेषुसंस्थि
तोमत्तकुंजरःकीदृशोभवति दानवकुलभ्रमररहितःदानेनमदेनव
कुलद्रुमस्थायेभ्रमरास्तेषांहितःप्रियःसमितिसंग्रामेतत्वतःइदमि
त्थंज्ञानेनलक्षणैस्तत्रचिन्हैःशिवंभवेस्पष्टात्वार्जुनिःकीदृशोभवे
त्तुपुनःसर्वे॰दानवकुलेदैत्यान्वयोयोभ्रमस्तेनरहितःइत्येकालाप
जातिः४२शब्दार्थलिंगवचनैर्व्यस्तैर्यत्रासमस्तकैःविभक्त्याशमि

न्नयत्तात्प्रभिन्नकमुच्यते ४२ प्रभिन्नकत्रभ्रस्पलक्षणमा
ह शब्दार्थेति यत्रभग्नं भस्तैः पदविभागैः कृत्वा प्रभिन्नं भवति
पृथक्कृत्रभग्नंस्यात् यत्रासमस्तकैः समुदायत्रभग्नरीत्याप्रभिन्नं
स्यात् कीदृशैः भस्तैः समस्तकैः शब्दार्थलिंगवचनैः शब्दा
र्थश्च लिंगवचनंच शब्दार्थलिंगवचनानि तैः शब्दार्थलिंगवचनैः
कस्मिंश्चित्त्रभग्नेशब्दार्थप्रस्तरीत्याप्रभिन्नं कुत्रचित् शब्दार्थरी
त्यासमस्तरीत्याप्रभिन्नं कुत्रचिल्लिंगभेदेनप्रभिन्नं कुत्रचित् व
चनभेदेनप्रभिन्नं कुत्रचित् शब्दार्थलिंगाभ्यांप्रभिन्नं कुत्रचित्

शब्दार्थलिंगवचनैः प्रभिन्नं कुत्रचिद्विभक्तिभेदेन प्रभिन्नं यत्तत्
प्रभिन्नकसंज्ञमुच्यते एवं सप्तभेदाः प्रभिन्नकप्रश्ना भवंति शब्दा
र्थभेदो यथा देवशब्दः मेघवाची सुपर्वाची राजवाची च लिंगभेदो यथा
तप तथा इत्यकारांतो निदाघवाची पुल्लिंगः तपः शांतं तपस्यावाचि नपुं
सकं वचनभेदो यथा नर इति प्रथमैकवचनं अकारांतस्य प्रथमा
बहुवचनं ना॰ नरौ नर इति विभक्तिभेदो यथा मास इति पंचमी
षष्ठी विभक्तिषु भवति ४२ निर्जितसकलारातिः पृच्छति को नैको
मत्यो भयमृच्छति मेघात्प्रये कृतरुचिरा शायाः किं तिमिरस्तया का
शिनिशायाः ४२ विधुतारातेजः । शब्दार्थलिंगभिन्नस्योदाहरणं द्वयं

श्लोकद्वयेनाह निर्जितेति निर्जिताः सकला आरातयः समस्तशत्रवो
येन सः निर्जितसकलारातिः पृच्छति कः एको मत्पोशकासाद्भयनञ्च
छति न श्राप्नोति प्रत्युत्तरं विधुतारातेजः हे विधुताराते अजः शिवः
पुल्लिंगः अजा विष्णुहरच्छागा इत्यमरः निशायाः रात्रेस्तिमिरः क्षयका
रि अंधकारायहारि किमिति पृष्टे प्रत्युत्तरं शब्दार्थलिंगभेदेनाह वि
धुतारातेजः विधोश्चंद्रस्य ताराणां नक्षत्राणां तेजो ज्योतिः नपुंसकं
कीदृग्रूपा निशायाः मेघात्ययेन मेघघापगमेन कृतो रुचिरा आशा दिग्य
रूपा सा तद्रूपाः ५२ विहंगपतिः कं हतवान हितं कीदृग्भवति पुरंजन

सहितं किंकविनं विदितं वदधीमद्यादपतिरपि कीदृग्भयकृत् ४३
अहिमकरमयः शब्दार्थलिंगभिन्नं। विहंगेति विहंगपतिः पक्षिरा
जो गरुडः कं अहितं शत्रुं हतवान् प्रत्युत्तरं अहिं सर्प्पं जनसहितं
पुरं नगरं कीदृग्भवति प्रत्युत्तरं अकरं अकरो दंडस्तेन हीनं हे धीमत्
बुद्धिमत् विदितं कविनं किं प्रत्युत्तरं अयः लोहं नपुंसकं यादःपति
रपि समुद्रोपि कीदृग्भवति वद प्रत्युत्तरं अहिमकरमयः अहयः
सर्प्पाश्च मकरा ग्राहाश्च अहिमकरास्तैर्मयः प्रचुरः पूर्णः प्राचुर्ये प्राधान्या
र्थे प्रत्यये मयट् पुंलिंगार्थः इति शब्दार्थलिंगभिन्नं ४३ अनुकूलवि

धायि दैवतो विजयी स्यान्नतु कीदृशो नृप: विरहित एपपि जानुकी वने
निवसंती मुदमादधौ कृत: ४४ कुशलवर्द्धित:। शब्दार्थ विभक्ति भिन्न
स्योदाहरणं अनुकूलेति अनुकूले विधाय दैवतं दैवो भाग्यं वा यस्य स:
नृप: कीदृशो विजयी जयशील: प्रत्युत्तरं कुशलवर्द्धित: कुशलेन क्षे
मेन वर्द्धित: प्रवृद्धिं प्राप्त: कुशलं क्षेममस्त्रियामित्यमर: प्रथमा विभ
क्ति: विरहण पपि जानकी सीता वने निवसंती कृत: कस्मान्मुदं प्रीति
मादधौ प्रत्युत्तरं कुशलवर्द्धित: कुशश्च लवश्च कुशलवौ तयो: क्र
द्धिरभिवृद्धिस्तस्मात् पंचमी विभक्ति: ४४ कुसुमं पतदेत्यनाकतो वदक

स्मैस्पृहयंति भोगिनः अधिगम्य रतं वरांगणां कनुयत्नं कुरुते सु
शिक्षिता ४५ सुरतरवे ४५ शाब्दार्थविभक्तिनिन्नं । कुसुममिति
नाकतः स्वर्गात् कुसुमं पुष्पं पतत् पतमानं एत्य प्राप्य भोगिनः सुखिनः
कस्मै स्पृहयंति वांछति भोगः सुखे स्यादिमता वत्तेर्ष्वफणकायथोरि
त्यमरः प्रत्युत्तरं सुरतरवे कल्पवृक्षाय नु इति वितर्के सुशिक्षिता वरांगणा
चतुरा स्त्री रतं मैथुनम् अभिगम्य प्राप्य कयत्नं कुरुते प्रत्युत्तरं सुरतरवे सुरतस्य
गायनस्य रवे ध्वनौ ४५ कामुक्ता हारहरिरंबुधिमध्यमग्नां कीदृग्भ्रमं भव
तिनिर्मलमाममानां आमंत्रयस्व वनमग्निशिखावलीढं तत्त्वापिकोदृ

तिकेमदयंतिभृंगान् ध्दद्रुं दमकरंदविदव: शब्दार्थवचनस्मिन्न
स्योदाहरणमाह कामिति कश्चनपृच्छति हरिर्विल्फ: अंबुधिमध्यम
ग्नांसमुद्रेनिलीनांकांउद्धाहारकंईनीतवान् प्रत्युत्तरंकुंपृथ्वी आग
मानांवेदानांकीदृग्श्रुतंश्रवणंनिर्मलंपापोहंभवति प्रत्युत्तरं दमक
रंदमंइंद्रियनिग्रहस्तंकरोतीतियत्तत् वेदश्रुतिस्तथाम्नाय:स्वाध्याय:
छंदआगम इतिहलायुध: अग्निशिखावलीढं अग्निज्वालजालेलि
ह्यमानंवनंकाननंआमंत्रयस्वेतिपृष्टे प्रत्युत्तरं दविन्दवोस्मिनस्तीति
दवीतत्संवोधनं हेदवित् चपुन: तद्वनमपिकोदहति प्रत्युत्तरं दव: ।

वनाग्निः दवदावो वनारण्यवन्हीत्यमरः भृंगान् के मदयंति मत्तान्
कुर्वंति प्रत्युत्तरं कुंदमकरंदविंदवः कुंदस्य पुष्पविशेषस्य यो म
करंदः पुष्परसस्तस्य विंदवः विप्रुषः ४६ वसति कुत्र सरोरुहसंत
तिर्दिनकृतो ननु के तिमिरछिदः पवनभक्षोसपत्नरणोत्सुकं प्ररूप
माक्यको जगति प्रियः ४७ के किरणोत्कराः शब्दार्थवचनत्तिन्नं
उदाहरणांतरमाह वसतीति कश्चन पृच्छति सरोरुहाणां कमलानां
संततिः कुत्र कुत्रस्थवसतीति प्रत्युत्तरं के जले कं के शिवे जलमारभ्या
तं ननु निश्चितं दिनकृतो दिवाकरस्य तिमिरछिदः अंधकारध्वंसकाः

सु

केभवंतीतिपृष्टे प्रत्युत्तरं किरणोत्करा: किरणभृत्: पवनभक्षा
सर्प्पा: तेषांसपत्नो रिपुर्मयूरस्तस्परणोयुद्धेउत्सुकमुत्कं वित्तंपुरु
षं आक्रयेतिपृष्टे प्रत्युत्तरं हेकेकिरणोत्करा केकीमयूरस्तस्परणे
उत्कउत्कंवित: शिखावल: शिखीकेकीत्यमर: जगतिलोके
प्रिय: क: इतिपृष्टे प्रत्युत्तरं रा: अर्थ: अर्थरैविभवा अपीत्यमर: पूर्वं
किरणोत्कराइतिप्रथमावक्तुवचनमुक्तं पश्चात्रैशब्दस्यराइतिरू
पंप्रथमैकवचनमुक्तं शब्दार्थस्तुसर्वत्रपृथगेवोतस्मादेतत्प्रश्नंशब्दा
र्थवचनभिन्नसंज्ञकं ५७ कीदृग्गृहंयाम्यगृहंगतस्यकास्त्राणमंभ
स्तरणेजनानां भूषाणतेकंव्यकथंनुपृष्टेमुक्ताकलापेरितिचोत्तरंकिं

हाराविनाव: शब्दार्थविभक्तिलिंगभिन्नस्योदाहरणमाह कीदृगीति
यमस्येदं यास्यं यास्यं च तत् गृहं च यास्यगृहं यास्यगृहं गतस्य पुंसः गृ
हं कीदृगीति पृष्टे प्रत्युत्तरं हाराविहाय्युक्तः विषादेन शोकेन पीडया
च युक्ते रावः शब्दो यत्र तत् हाविषादशुगर्त्ति बिल्यमरः अंभसां
जलानां तरणे परपारगमने काः शरणं शरणं प्रत्युत्तरं नावः नौका
श्रे नु इति पृष्टे हेवः पुनरर्थे हे कं वहे गलतेत्त वभूषा अलं क्रियाकथं
न मुक्ताकलापे मुक्ताहारैरिति अमुना प्रकारेण पृष्टे कं वेः प्रत्युत्तरं
वदति हाराविनावः हे हाराः वो विना युष्मान् विना कं वस्यालं कि
याकथं न मुक्ताकलापेः नास्ति नावं इति स्त्रीलिंगः प्रथमावहुव

चनंच वं इति मुष्ण च्छ स्य द्वितीयाबहुवचनादेशः शब्दार्थ
विभक्तिभेदो लिंगभेदश्चोक्तः ४८ कवयो वद कुत्र कीदृशाः कविनं
किं विदितं समंततः अक्षनावैरियोषितां कदितापः प्रवलो वि
लायकाः ४८ गिरिसारमुखाः। शब्दार्थविभक्तिलिंगभिन्नाः शब्दा
र्थविभक्तिलिंगभ्रम[illegible]दाहरणानंतरमाह कवयः इति कवयः
पंडिताः कुत्र कस्मिन्विषये कीदृशा भवंति वदेति पृष्टे प्रत्युत्तरं
गिरिसारमुखाः गिरिवाण्यास्तारं रहस्यं मुष्णंति अपहरंतीति गि
रिसारमुखाः मुषस्तेये समंततः परितः विदितं प्रसिद्धं कविनं किं

त्युत्तरं गिरिसारलोहं लोहोस्त्री शास्त्रकंती त्वांपिंडंकालायसा
यसीयेसायसी अश्मसारइत्यमरः पुनः पृच्छति अधुनातववीर
योषितांशत्रुस्त्रीणांहृदयेकाविरहायतापः प्रवलइतिपृष्टे प्रत्युत्तरं
उषारात्रिः तदंतंवाउषारात्रेरवसानइत्यमरः उषारात्रौतदंतेस्या
दन्यत्राश्रयमप्युषेतिविश्वः सारमुषाइतिपुल्लिंगः प्रथमाविभक्तिः
पक्षेउखास्थलीवनस्थलीभुवा उषाइतिस्त्रीलिंगेद्वितीयाविभ
क्तिश्च ४८ मेघालयेभवतिकिंतुभगाववगाहं कावाविडंवयतिवा
रणा[illegible]वेरपाः दुर्वारवीर्यविभवस्यभवेदृणेकः कास्मैरवक्रेसु

भवति ४

भगोस्तरणे: प्रभाभि: ५० सरोजराजय: ५०। शब्दार्थविभक्ति
लिंगभिन्नं शब्दार्थवचनालिंगभिन्नस्योदाहरणद्वयंश्लोकद्वये
नाह मेघात्ययेति मेघात्ययेशरत्कालेसुभगावगाहशोभनंमज्जनोम
ज्जनयोर्यं किं? प्रत्युत्तरं सर० सरसीकासार: सरसीसरइत्यमर:
वारणाश्च मत्ताश्चवेश्याश्चवारणामत्तवेश्यास्ता: वेत्यवधारणे का
विडंवयति प्रत्युत्तरं जरावार्द्धक्यं दुर्वारवीर्यविभवस्यभूपस्यरण
क: भवेत्र प्रत्युत्तरंजय: विजय: तरणि प्रभाभि: सूर्यकिरणे: स्मे
रवक्त्रेणसस्मितवक्त्रेणसस्मितमुखेनसुभगा: शोभना: का: प्र

शब्दार्थवचनालिंगभिन्नं ३

३१ त्सुंदरं सरोजराजयः कमलानि तेखाः ५० पृच्छति शिरोरुहोम
धुमथनं मधुमथनस्तं शिरोरुहं च कः खलु चपलतया भुवि वि दि
तः कांचनतनुयानततनया भाविदि गदिता ५१ केशवनोका शिरो
रुहः केशाः मधुमथनः केशवं पृच्छति च पुनः मधुमथनः के
शवस्तं शिरोरुहं पृच्छति० किं पृच्छति इत्याह भुवि भूतले चपल
स्वभाव श्चपलता तया चपलतया कः विदितः एवं शिरोरुहेन पृ
ष्टेन मधुमथनो वदति केशव नोका वनेभ्यो कः स्यानेयस्यास
वानर इत्यर्थः न नु इति पृष्टे भुवि जले मातस्वाम्बुजले भुगोरिति ना

नार्थः यानतयायानस्यभावो यानता तयायानतया कामादिता उक्ता
मध्कमथनेन दृष्टः शिरोरुहोवदति हे केशवनौकानावः ५२ नभवति
मलयस्य कीदृशीभूः कइह ऊर्चंनविभर्त्तिकिंगताश्रीः भवदरिनिवहेषु
कास्ति नित्यंवलमथनेनविपद्यवायिकेषां ५२ विपन्नगानां शब्दार्थ
लिंगभिन्नं शब्दार्थवचनभिन्नस्याद्यमुदाहरणं यथा नेति कश्चनष्ट
छतिकीदृशीभूमिः मलयस्य गिरेर्नभवति प्रश्नुत्तरं विपन्नगा अपग
ताःपन्नगाः सर्प्पायस्यासाः सर्प्परहिता मलयाचलभूमिर्नाश्रिताः पुत्तु
(नर श्री विष्णु) भवति इहलोके कः ऊर्चंस्तनंन विभर्त्ति निधिभर्त्ति नधरति

अत्युत्तरं नाखुमानुपुनः पृछतिश्रीलक्ष्मीः कंगताः कमाश्रिताः।
अत्युत्तरं अं॰ विष्णुं अकारोवासुदेवः स्यादित्येकाक्षरानिधानः
भवदरिनिवहेषु भवतांरात्रुवर्गेषुनित्यंकास्ति अत्युत्तरं विपत
आपत वल्लमसुरं मथ्नातीतिवल्लमथनः शक्रस्तेनकेमां विपत्तं
व्यधायिकृता अत्युत्तरं नगानां शैलानां तरूशैलौनागावगौ वित्य
मरः वलारातिः शचीपतिः ५२ समयमिहवदंतिकंनिशीथं शमयति
कान्वदवारिवाहवृंदं वितरतिजगतांमनस्सुकीदृग्मुदमतिमात्र
मयंसदातडागः ५३ अरविंदवान् शब्दार्थवचन विभक्तिभिन्नं ५३

अस्यैवोदाहरणांतरमाह समयमिति इहलोके कं समयं कं कालं नि
शीथं नक्तं वदंति विद्वांस: इति शेष: वस्तुत्तरं अरवि: न विद्यते रवि:
यस्मिन् स: अरवि: तं नक्तं निशीथे रजनी रात्रिर्दोषा विभावरी तितारा
भिधान: वारिवाहवृंदं मेघसमूह: कान् शमयति निर्वापयति वस्तु
त्तरं दवान् वनाग्नीन् दवदावौ वानरन्य इत्यमर: सदा निरंतरं अयं
दृष्टिगोचरस्तडाग: कीदृश: जगतांमन: सुलोकानां चित्तेषु मात्रेण
रिमनविशेषं प्रतिक्रम्य वर्त्तते इ। त्याति मात्रं मुदं हर्षं वितरति वय
छति० वस्तुत्तरं अरविंदवान् कमलोपशोभित: दवानिति द्वितीया

३३ विभक्तिस्तदकवचनंच अरविंदवानिति प्रथमाविभक्तिरेकवचनं
एतेनशब्दार्थवचनविभक्तिभिन्नसंज्ञंप्रश्न-मेतत् ५३ कीदृक्संसमि
ति वलंनिहंति शत्रुंविष्णोःकामनसिमुदंसदातनोति तुभ्यंसच्छर
धिमुखंनिगद्यते किंपंचत्वेःसमभयमानएककेषु ५४ अभिमानषु ५६
शब्दार्थलिंगवचनभिन्नस्योदाहरंयथा कीदृक्षमिति समितिसंग्रामे
कीदृशंकंवलंशौर्यं शत्रुंनिहंति घातयति वरूथिनीवलंशोभमित्यमरः
प्रत्युत्तरं अभिनिर्नविद्यतेभीर्भयंयत्रततत्भयरहितमित्यर्थः सदाविष्णो
र्मनसिहरेश्चित्तेकामुदंतनोति प्रीतिंविस्तारयति प्रत्युत्तरं मालदसी:

तुखंसतरिक्तिंसतत्रारधिमुखत्तूणीकोशंकिंनिगद्यते उच्यते० उ
त्तुत्तरं अनिषुनविद्यंतेइषवोबानायस्मिन्तत्तूणोपाशंगतूणी
रनिषंगाइषुधिर्द्वयोरित्यमरः अपमानएव अङ्गेवपंचत्वैःसमंमर
णंतुल्यंकेषु० उत्तुत्तरं अभिमानिषु अभिमानयुक्तेषुपंचत्वंम
रणंमृत्युः कालधर्मइतितारानिधानः ५४ घनसमयेशिखि
षुस्यान्तत्संकीदृक्त्वाकिंघनात्पतति प्रावृषिकस्यनगमनंमान
सगमनायकीदृशाहंसाः ५५ समुत्सुकमनसः शब्दार्थलिंगवच्च
नभिन्नं।५५।उदाहरणांतरमाह घनेति घनसमयेप्रावृिकाले

कीदृक्षुशिखिष्वनृत्यंनटनंस्यात् प्रत्युत्तरं समुत्सुहर्षेषु घनान्मेघात्
प्रा किंपतति प्रत्युत्तरं कंजलं वृषिवर्षाकालेगमनंगतिःकस्यनस्यात्
प्रत्युत्तरं अनसः शकटस्यल्कीवेनः शाकटोस्त्रीतास्यादित्यमरः
मानसस्ट्रेवसरस्तत्रगतिगमनंमानसगमनंतस्मैमानसगमनायहंसाः
राजहंसाःकीदृशाभवंतीतिपृष्टे प्रत्युत्तरं समुत्सुकमनसः उत्कंठित
चेतसः अनसंशतिनपुंसकलिंगंषष्ठ्येकवचनंचसमुत्सुकमनसः इ
तिपुल्लिंगोवकवचनंचशब्दार्थलिंगभिन्नं इतिप्रभिन्नकजातिः ५५
अर्थमात्रेकभेदेनभिन्नंवध्नंतिकेनचसुकुमारंधियस्तध्याविदःधेन्नां

द्रुतंयथा ५६ प्रकारांतरमाह ॥ अर्थेति केच न सुकुमारंधियः अल्प
बुद्धयः अर्थमात्र एको भेदोयस्मिन्नसः तेनलिल्लंबधातितत्रप्रश्नावि
दधेराद्रुतं चकारान्ततयथाद्ध्यिति ५६ आनंदयति कोत्सर्थसङ्ग
नानेवभूतले प्रबोधयतिपद्मानितमांसिचनिहंत्यकः ५७ मित्रोदयः
आनंदयतिभूतले पृथ्वींसङ्गनानेवोत्सर्थकः आनंदयतिमित्रोद
यः मित्राणामुदयः पद्मानिकः प्रभुत्तरं कोवोधयतिपुनः तमांसिअं
धकाराणिकः निहंति प्रभुत्तरं मित्रोदयः सूर्यस्योदयः घ्नमाणिस्त
रणिंमित्र इत्यमरः ५७ अटवीकीदृशी प्रयोऽगमा भवति प्रिये प्रि

यस्य कीदृशी कांता तनोति सुरतोत्सवं ५७ मदनवती अटवीति कश्चन
पृच्छति कीदृशी अटवी वनस्थलीदुर्गमा भवति प्रत्युत्तरं मदनवती मद
नो धत्तूरस्तेन युक्ता मातुलो मदनश्चैव धत्तूरकनकाह्वयः इति नामाभि
धानः कीदृशी कांता प्रियस्य सुरतोत्सवं तनोति ॰ प्रत्युत्तरं मदनवती॰
कामिनीत्यर्थः ५८ भिन्नाववरूपं कर्तव्यौ शब्दार्थौ प्रश्नकोविदौ लिंगा
दिषु यथाशक्तिभेदमाकुर्विपश्चितः ६० इति धर्मदासकृतौ विदग्धमुख
मंडने प्रथमः परिच्छेदः १ भिन्नाविति तस्मात्प्रश्नकुशलैरववरूपं शब्दा
र्थौ भिन्नौ कर्तव्यौ लिंगादिषु लिंगविभक्तिवचनेषु यथाशक्त्या यथाम

त्तिविपश्चितः पंडिताः भेदमाकुर्वदंति ५८ ताराचंद्रकृतायामस्याविद्व
न्मनोहराख्यायांटीकायांसरहस्यः प्रथमः परिछेदः १ विशेषणंविशेष्यं
चयत्रप्रश्ने विधीयते भेद्यभेदकमोक्तस्तंप्रश्नंप्रश्नविदोयथा १ पूर्वपरि
छेदेप्यस्तादिप्रश्नकांतानांप्रश्नानामुदाहरणानिमुक्तानि इतिइदानींभेद्य
भेदकजातिर्लक्षणमाह विशेषणमिति यस्मिंप्रश्ने एकवाक्येविशेषणं
विशिष्टंचविधीयते कविनांतंप्रश्नंप्रश्नविदोभेद्यभेदकसंज्ञकमा
क्तः प्रोचुः १ तरप्रश्नप्रयथादर्शयितीत्यर्थः १ भेद्यभेदकयोः जातेरुदाहर
णंश्लोकाभ्यामाह कीदृक्किंस्यान्नमत्स्यानांहितंस्वेछांविहारिणां गुणैः परेषां

मत्पर्थंमोदतेकीदृशःपुमान् २ विमत्सरः भेद्यभेदकजातेरुदाहरणंक्षाम्या
माह कीदृगीति स्वेच्छाविहारिणां मत्स्यानां कीदृक् किंविहितंनस्यात्
२६६ इतिपृष्टेप्रत्युत्तरं विमत्सरः विमत्विपक्षीतद्युक्तंसरः तडागंविमर्दे
विशेषणंसरइतिविशेष्यं परेषांगुणैरन्येषांसच्चरितैःकीदृशःपुमा
न् अर्थैस्त्यंमोदतेहर्षितोभवति प्रत्युत्तरंविमत्सरः अन्यशुभद्वेषर
हितः मत्सरोन्यशुभद्वेषीत्यमरः २ अगस्त्येनपयोराशेः किंयत्
किंपीतंमुंडितं त्वयावैरिकुलंवीरसमरेकीदृशाः कृतं ३ सकलंकं।
भेद्यभेदकजातिः अगस्त्येनमुनिनापयोराशेःसमुद्रात्कियत् ० किं
पीतंकियत्किंउग्रव इतिपृष्टे प्रत्युत्तरंसकलंकं सकलंसमस्तकं

कंजलं सर्वजलं पीतं सर्वजलमित्यर्थः अत्र सकलमिति विशेषणं
किमिति विशेष्यं हे वीर त्वया समरे युद्धे वैरिकुलं शत्रुसंतानं कीदृक् कृतं ०
प्रत्युत्तरं सकलं केन सहितमित्यर्थः ३ भेद्यभेदयोर्जातिः ३ दीर्घवृत्ते
न यत्पृष्टमुत्तरं कियदक्षरं तदोजस्वीति विख्यातमूर्जितं चेति केचन ४
ओजस्विजातेर्लक्षणमाह दीर्घेति यद्दीर्घवृत्तेन पृष्टं तदुत्तरं कियत् अ
क्षराल्पाक्षरो भवति तदोजस्वीति विख्यातं केचित तमूर्जितसंज्ञमा
हुः ४ कामिन्याः स्तनभारमंथरगते लीलाचलचक्षुषीः कंदर्पैकवि
लासनित्यवसतेः कीदृक् प्रमान्वल्लभः हेलाकृष्टकृपाणपाटितगजा

नीकात्कुतस्तैरयस्त्रासायासविशुष्ककंठकुहराणियांति जीवाध्वनिः ५
समरतः ५ एतदुदाहरणंयथा कामिन्याइतिकामिन्याकीदृक्कुसुमानुव
द्धभः प्रत्युत्तरं समरतः समंरतमैथुनंयस्यासः कीदृग्रूपाः कामिन्याः स्त
नयोर्भारेणमंथरामंदागतियस्याः पुनः लीलायाश्चलंतीचंचलेचक्षुषी
यस्याः पुनः कंदर्पैकविलासस्यनित्यावसतिः स्थानंयस्यानस्य वसती
रतिवेश्मनोरित्सुमरः तेरयः तवशात्रवः जीवनकामाः कुतोनिर्यांतिउप
पसरंति प्रत्युत्तरंसमरतः समरसंग्रामस्तस्मात्कीदृशात् रहेलनयाक्षा
कृष्टेनकृपाणेनपाटितानिगजानांअनीकानिश्रेण्यानियस्मिन्सयथा

कीदृशाऽरयः आसापाशेनविशुष्काणिकंवक्त्रकुहराणियेषांते० कुहरं
शुषिरंविवरमित्यमरः ० ५ दैत्यारातिरसौवराहवपुषाकामुद्गाहारांबुधेः
कारूपंविनिहंतिकोमधकवधूवैधव्यदीक्षागुरुः स्वच्छंदनवसल्लकी
कवलनैःपंपासरोमज्जनैः कोविंध्याद्रिवनेवसंत्यभिमतक्रीडाभि
रामोस्थिताः ६ ॐ जराः ओजस्विजातिः ६ उदाहरणांतरमाह दैत्येति
असौजगत्पालकोदैत्यारातिविष्णुः वराहवपुषावराहावतारेण अंबु
धेः सकाशात् कांउद्गाहारंउद्धृतवानितिपृष्टेप्रत्युत्तरं ॐ पृथ्वी रूपं
चक्षुस्पर्शादिकाविनिहंति प्रत्युत्तरं जरावार्द्धक्यं मधकनाम्नोदैत्यस्यप्रव

धूयायातस्यावैधव्यंदानदीव्हायांगुराचार्यकः प्रत्युत्तरंत्र्प्रःविप्लु:
स्वछंदंनिरवग्रहंयथानवसद्मेकीकेवलनैःनवाचासौसद्मेकी
चनवंसद्मकीगजभद्याःतस्यावकलानिस्वदनानितैःपंपासर
रसेमज्जनैःकृत्वाविंध्याद्रिःवनेकेवसंतिप्रत्युत्तरंकुंजराःगजाःकी
दृशाःअभिमतक्रीडाभिरामोस्थिताःअभिमताचासौक्रीडाचअभि
मतक्रीडा अभिमतक्रीडायाभिरामंअभिमतक्रीडाभिरामंतत्रयाति
दृंतियेते ओजस्विजातिः ६ उपमादिरलंकारोवक्रुधापरिकीर्त्ति
तःयत्रेकथितसार्द्धंसालंकारोतदुच्यते ७ सालंकारजातेर्लक्षण

त्रं

माह उपमेति उपमीयतेऽनयेत्युपमा उपमाऽऽद्यादिर्यस्य स उपमादिरलंक्रियतेऽनेनेत्यलंकारः वक्रप्रकार इति वक्रधा परिकीर्त्तितः उक्तः यत्र श्रुते न उपमाद्यलंकारेण सार्द्धं कथ्यते सोऽलंकारसंज्ञं तदुच्यते ७ कल्याणवाक्कुलत्वमिव किंपदमत्र कांतं सङ्कुपतेस्त्वमिव किंपरितोषकारी कसर्वदा ह्वषगतिमात्रं नृत्पाश्रितं कथ पर्यलितसर्वभूतः ८ त्रां करः ८ अस्योदाहरणं यथा कल्याणेति कश्चन पृच्छति अत्र लोके यथालं कल्याणवाक्कुभवति तथा त्वमिवं किं पदं कांतं शं शिवं कल्याणमित्यर्थः सङ्कुपतेस्त्वमिव परितोषकारकः

३९ प्रत्युत्तरं करदंड: भागधेयकरो वरिस्यर्थ: सर्वदा अति मात्रं भूत्या
श्रित: ऐश्वर्यवान् वृषगतिसुकृती पालितसर्वभूतप्रजालोकस्त्व
मिवकं: प्रत्युत्तरं शंकर: शिव: कीदृश: अत्यंतविभूतिभूषित:
वृषभगामी पालिता: सर्वभूता दयो येन स: विभूतिर्भूतिरैश्वर्यं सुकृते
वृषभे वृषधृतिना नार्थ: इवेति कद्रूपोर्णे ७ सूर्यस्य कांति मिरकुंजरवृं
दसिंहीसत्यस्य का सुकृतवारिधिरंड्लेखा पार्थश्च कीदृगारिदावकृता
सनीभूत्कोलंती कुसुमुदामहरस्य मूर्द्धि: ८ भागीरथी सालंकारजाति: ८
उदाहरणांतरमाह सूर्यस्य विवश्वतस्तिमिरकुंजरास्तेषां वृंदं समूहं
तिमिरकुंजरवृंदं तस्य सिंही अपहंत्री तिमिरकुंजरवृंदसिंही का प्रत्युत्तरं
मा

दीप्तिः आभा कांतिद्युतिश्छविरित्यमरः सत्यस्य सुकृतस्य पुण्यस्य वा
रिधिः समुद्रः सुकृतवारिधिस्सा चंद्रलेखा कान्त्युत्तरं गीः वाणी गीर्वाग्
वाणीत्यमरः पुनः प्रथाया ऊत्ता पार्थः अर्जुनः अरिदावकृशानः अरी
णां शत्रूणां दावकृशानो दावानलः कीदृग्भूदिति दृष्टे प्रत्युत्तरं रथीर
थोस्यास्तीति रथी रथयुक्त इत्यर्थः शतांगस्स्यंदनो रथ इत्यमरः हरस्य शि
वस्य मूर्द्धिमस्तके मालतीकुसुमदामजाता कुसुममाला का भागीरथी सु
मनामालतीजातीरित्यमरः ८ लघुवृत्तेनयत्पृष्टं भूतादुत्तरमुत्तमं सकौ
तुकमितीच्छंतितद्विदश्शारद्विदं यथा १० कोस्थिराः केप्रियास्त्रीणांको

प्रियो नक्तमाकयः नृत्यभूः कीदृशी रम्या नदी कीदृग्घनागमे ११ अ
गाधवारिर्धूरिपूरित रजनि ततरंगा सकौतुकजातेर्लक्षणमाह त्वधि
ति यस्त्वद्युवृत्तेन पृष्टं सत्यस्ताक्षरेण प्रचुराक्षरेणोत्तरं तत्सकौतुक
संज्ञमित्यादि दंसकैः कौतुकं यथा प्रदर्शयति १० क इति कश्चन पृच्छ
ति स्थिराः के प्रत्युत्तरं अगाः शैलाः स्त्रीणां प्रियाः के प्रत्युत्तरं धवाः प
तयः याति प्रिया कः प्रत्युत्तरं रिपुः शत्रुः नक्तं निशीथं आकया प्र
त्युत्तरं रजनि नक्तं च रजनाविल्पमरः रम्यान्यनृत्यभूः मनोज्ञा नृ
त्यभूमिः कीदृशी प्रत्युत्तरं ततरंगा ततेन वंसादिचतुर्विधवाद्येन

युक्तोरंगोनृत्यस्थानं यस्याः ततं वीणादिकं वाद्यमित्यमरः रंगस्था

ननर्त्तनस्थानमितिहलायुधः घनागमे वर्षाकालेन नदी कीदृशी रु

अगाधवारिपूरजनिततरंगा अगाधश्चासौ वारिपूरश्च

अगाधवारिपूरस्तेन जनिता उदिता स्तरंगा ऊर्म्मयो यस्यां

सा अगाधमतलस्पर्शं भिंगस्तरंग ऊर्म्मिर्वा इत्यमरः १९

कारुता विलुना कीदृग्योषितां कः ब्रशास्पते असेव्यः कीदृश स्वामी

कोनिहंति निशात्मः १२ ऊमुदवनवांधवोदयः १२ उदाहरणांतर

माह केति विश्कना जग व्यापकेन कारुता यत्सुत्तरं ऊमुत्व को

प्रथिमांमुतहर्षः मुतप्रीतिप्रमदोहर्ष इत्यमरः योषितांस्त्रीणांकी

स्त्रा दृकूकः प्रश्नपति प्रत्युत्तरं अवनवान्वयपवः अरणंरक्षणंतद्वक्तिः

धवोपतिः असेव्यः सेवाकर्त्तुमनर्हः स्वामीप्रभुः कीदृशाः प्रत्युत्तरं

अदयः दयारहितः निशातमः रात्रोस्तिमिरंकोनिहंति० प्रत्युत्तरं

कुमुदवनबांधवोदयः कुमुदवनानांवनंकुमुदवनंस्यबांधवश्चं

द्रस्तस्योदयः इंदुः कुमुदबांधव इत्यमरः सकौतुकजातिः २२

प्रश्नोत्तरसमजातेर्लक्षणमाह प्रश्नेतिरसमजातेर्लक्षणमाह प्रश्नेति

यत्रप्रश्नेप्रश्नवर्णप्रश्नवर्णस्यतुल्यमुत्तरं निः संदिग्धंस्यात्तत्प्रश्नोत्तर

समसंज्ञमाकुस्तज्ज्ञानंतीतितज्ज्ञाः श्रूयतांभवद्भिरितिशेषः यथाप्रदर्शि
यति १३ अस्योदाहरणं यथा कमिति मज्ञानकं मदोत्पादकं कंदर्प्पकं
गर्वश्चाकुरितिपृष्टेइदमेवोत्तरं कंदर्प्पमदनोदर्प्पोमदोवलेपोमानोगर्वो
भवेदहंकारइति हलायुधः पुनरर्थे इहलोकेकाचघटीकल्पश्री अत्यंत
माअतिशायेनस्वच्छ निर्म्मलेत्यर्थः वस्तुत्तरं तदेवकाचघटी काचस्यम
णेर्घटीमध्यदेशेसीसीतिख्यातिः इत्यादिप्रश्नेतितदुक्तं उ चिंतामुत्तरंतवि
चिंत्यविचार्य श्राशुरश्रीध्वंब्रूतंध पथीति पथिमार्गेकोविरहीस्वादिवियु
क्तः कष्टं तिदुखमनुभवति प्रश्नान्तरमेवोत्तरं पथिकः अध्वगः ना

विनौकायां कास्ते कस्तिष्टति प्रत्युत्तरं नाविकः कर्णधारः कीदृशः त
त्कृतरक्षः तस्या नौकाया कृता रक्षा येन सः कर्णधारस्तु नाविक इत्यमरः
उत्तम पुरुषेति सर्व्वबुद्धिः अप्रत्यक्षं प्रश्नोत्तरजातिः २५

यस्मिंनुत्तरमुत्तार्य्यप्रश्नतस्यैवप्रवृत्तते पृष्टप्रश्नंतदिच्छंति प्रश्नोत्तरवि
दोयथा २६ पृष्टप्रश्नेजातेर्लक्षणमाह यस्मिन्निति यस्मिन्प्रश्नेउत्तर
उच्चार्यतस्यैवोत्तरस्यप्रश्नपृच्छ्त तेनत्पृष्टप्रश्न संज्ञं प्रश्नोत्तरविज्ञाः यथा
दर्शयिति २६ लक्ष्मणोत्युत्तरं यत्र प्रश्नस्यात्तत्रकीदृशाः ग्रीष्मोद्विरदवृंदा
यवनालीकीदृशीहिता २७ कासारसहिता २७ लक्ष्मणेतियत्रप्रश्ने
लक्ष्मणोत्युत्तरंभवतितत्रप्रश्नःकीदृशाःस्यादितिपृष्टेप्रत्युत्तरंकासारसहि
ता कासारस्यपक्षिविशेषस्यहिताप्रियाकाभवतिएवंपृष्टेलक्ष्मणोत्यु
त्तरंसिध्यति सारस्यतुलक्ष्मणेत्यमरः ग्रीष्मेनिदाघकाले द्विरदवृंदा

यगाजत्रुथायवनालीवनश्रेणीकीदृशीहितासुखदाप्रत्युत्तरंकासार
सहिताकासारेणसरकासारेणसरसासहित्ता कासारस्सरसीसर
इत्यमरः वीथ्यालिरावलिःपंक्तिःश्रेणीत्यमरः २७ चादयइतियत्रस्या
दुत्तरंतत्रकीदृशःप्रश्नःकथयत्वरितंकेस्फनैकायावाह्नोपयाया: २८
प्रष्टप्रश्नस्योदाहरणांतरमाह चादयइतियत्रप्रश्नेचादयइत्युत्तरंस्या
त्तत्रप्रश्नःकीदृशोभवति केनिपाताःनिपातसंज्ञाःकेभवंति एवंपृष्टे
चादयोभवंतिनिपाताइत्युत्तरंसिद्धं पुनःपृच्छतिनौकायास्तरणेवहि
नोपायाःपारावारगमनसाधनानिकेस्फरितित्वरितंशीघ्रंकथयेति

पृष्टे प्रत्युत्तरं केनिपाताः अरित्राणि अरित्रं केनिपातकाइत्यमरः मध्य
देशे डांडे इति ख्यातिः इति पृष्टप्रश्नजातिः १८ कथयामुकमित्यादिर्निरुक्तं
यत्रोत्तरं भवेत् भग्नोत्तरं तदिच्छंति काकुमात्रेण गोपितं १८ भग्नो
त्तरजातेर्लक्षणमाह कथयेति यत्र प्रश्ने अमुकं कथयेत्यादिपदं व्यक्तोत्त
रं भवेत् तद्भग्नोत्तरसंज्ञमिच्छति कीदृशं तत् काकुमात्रेण पिगोपितं शो
कभयादिजनितविकारेण गोपितं मप्रकारं काकुः स्त्रियां विकारोयश्च शा
भीत्यादिभिर्ध्वनेरित्यमरः १९ भवत इवाति स्वच्छं कस्याभ्यंतरमगाधमतिशि
शिरं काव्यामृतरसमग्नत्वमिवसदाकः कथय सरसः २० भग्नोत्तरजा

तेरुदाहरणाद्वयंश्लोकद्वयेनाह भवत इति भवत इवत एवयथाभवतत
थाकस्यमम्यंतरमंतःकरणंस्वछंनिर्म्मलंअगाधंगंभीरंअतिशिशिरं
अतिशीतलमितिपृष्टेप्रत्युत्तरं सरस:कासरस्यशि।शिरोजरोडस्तुषा
रशीतल:शीतइत्यमर:सदात्वमिव काव्यामृतरसेपुभग्नोलीन:क:क
थय:प्रत्युत्तरंसरस:रसे:शृंगारादिभिरष्टभि:सहित: २० वीररसरूपि
रिपूणांनियतंकाहृदयशालिनीभवति नभसिव्रास्यिजलदेकाराजा
तिदेववदत्तारांभग्नोत्तरजाति: २१ सरूपिवीररसक्रोधेसुभटेसतिनि
यतंनिश्चितंरिपूणांहृदयशालिनीकाभवति तारा इत्यत्रकीरंमक्तंप्र

त्युत्तरं ददाति आराचर्मभेदिकास्यादाराचर्मप्रभेदिकेत्यमरः प्रस्थित
जलभेदेनभासि मेघरहिते आकाशेकाजराजिंतिशोभते हे देववद
प्रत्युत्तरं नक्षत्रं नक्षत्रमृक्षंभंताराभेदिकेत्यमरः २१ यत्पृष्टंप्रश्नवाक्ये
स्यादादिमध्यांतरंस्थितं उत्तरंतंत्रिधाप्रोक्तमादिमध्यांतसंज्ञितं २२ भ्रम
रहितः कीदृक्लोभवतितरांविकशितपक्षः ज्योतिषिकः कीदृक्षः प्रायोभु
विपूज्यतेलोकेः २३ भग्नोत्तरजातिः यदिति प्रश्नवाक्ये प्रश्नके आदिम
ध्यांतस्थितंयत्पृष्टंस्यात्तदुत्तरंत्रिधा आदिमध्यांतसंज्ञितमिति आद्युत्तरं
संज्ञामध्योत्तरंसंज्ञकं अंतोत्तरसंज्ञंचेत्यर्थः तिङ्सुबंतचयोवादाप्यैकं

क्रियावाकारकान्वितेत्यमरः २२ तत्राद्यंतरजातेराद्यमुदाहरणमाह भ्र
मेति तत्रामतिशयेनविकशिताविकचः पद्मः भ्रमराणांहितः प्रियः की
दृक्कंभवंति प्रत्युत्तरं श्लोकादावाह भ्रमरहितः भ्रमकंपस्तेन हृतः वाप्तुं
सिपद्मंनलिनमित्यमरः भुविभूमौप्रायोवाकल्पेनज्योतिःशास्त्रेलोके
मनुष्यैः कः पुरुषः कीदृक्तः कथंश्रुयते प्रत्युत्तरं तदेव भ्रमरहितः श्रयं
भ्रांत्यारहितइति भ्रांतिर्मिथ्यामतिर्भ्रमइत्यमरः २३ प्रभवः कोगंगायाः
नगपतिरित्तिसुभगः श्रंगधरः केसेव्यंतेसेवकसार्थैरत्यर्थमर्थरतैः २४ आ
द्यंतरजातिः २४ आद्यंतरजातेरुदाहरणांतरमाह प्रभवतिकः नगपतिः
शैलराजः गंगायाः भगीरथीः प्रभवः आद्योपलंनदिस्थानं प्रत्युत्तरंप्र

भवः नगपतिरिति विशेषणाद्देवप्रभवो हिमालयः यथा वाल्मीकिसंस्कृ
तप्रभवः तथा हिमवान् गंगायाः प्रभव इत्यर्थः स्याज्जन्महेतुः प्रभवः स्थानं
वा चाद्योपलब्धये इत्यमरः कीदृशो नगपतिः अतिशुभगानि शृंगाधरतीति अ
तिशुभगशृंगधरः पुनः कृतानि अत्यर्थवाकल्पेन अर्थरतेर्द्रव्यपरैः सेव
कसार्थैः भृत्यसंघातैः के सेव्यंते इति पृष्टे चत्वुत्तरं प्रभवः स्वामिनः २४
अयमुदितो हिमरश्मिर्वनितावदनस्य कीदृशाः शादृशाः नीलादिको पलंभः
स्फुरति प्रत्यक्षतः कस्य २५ गौरिकमनः शिलादिः प्रायेणोत्पद्यते कुतो नगतः
यः खलु न चलति पुरुषः स्थानाद्रुक्षः स कीदृक्षः २६ मध्यमोत्तमजातिः २६

आद्युत्तरजातिः ४ मध्यमोत्तरस्योदाहरणद्वयंप्रदर्शयन्नाह अयमिति
अयमुदितोहिमरश्मिश्चंद्रः वनितावदनस्यस्त्रीमुखस्यकीदृशः त्वत्तु
त्तरंसदृशाः समंततः नीलादिकोपलंभः नीलादिमणीनामभुवः कस्यप्रद्य
दोतः स्फुरति प्रत्युत्तरं सचक्रूषः उपलंभस्त्वनुल्लवइत्यमरः २५ गैरि
केति गैरिकंचमनःशिलाच आदिर्यस्यहरितालहिंगुलादिः सः प्रायेनवा
कल्पेनकृतः कस्याउत्पद्यते प्रत्युत्तरंनगतः गतोनेत्यर्थः मध्योत्तरजातिः
२६ कस्मिन्वसंतिवदलीनगणा विकल्पंकिंवापदंकिंकुरुते
लवान्पथिकान्गणाना
विवश्वान् विघ्नव्रताव

मुद्वेजको भवतिकः खलुवारिवाहः २७ अंतोत्तरजातेराद्यमुदाहरण
माह कस्मिन्निति मीनगणा मत्स्यसमूहाः कस्मिन्वसंति॰ प्रत्युत्तरंवा
रिजलोवार्वारीत्यमरः किंवापदंविकल्पंवदति प्रत्युत्तरंवाविकल्पेचे
त्यमरः विवश्वान् भाश्वरः किंकुरुते प्रत्युत्तरं अहः दिनं द्विवादिनाह
रीधकम्श्च घस्त्रो दिवसवासरो अस्त्रियांवित्तितारा भिधानः खलुनिश्चितं
पथिकां गणानां अध्वगस्त्रीणां वियोगणीनामितियावत् उद्वेजकः उ
द्वेगकारिकः प्रत्युत्तरंवारिवाहः जलधरः त्रा अब्दोधाराधरोवारिवाहोज
लधरोंबुदइतितारा भिधानः कीदृशोवारिवाहः विधृतलतावलयवान्

तडिल्लतावयेनयुक्त इत्यर्थः तडित्सौदामिनीविद्युदित्यमरः २७ शाब्दः
प्रभूगत इति प्रचकराभिधायी कीदृग्भवेद्वदन शाब्दविदो विचिंत्य कीदृग
ता बृहस्पतिमते विदं नियोगः प्रायः पुमान्भवति नास्ति कवर्गमध्यः २८
अंतोत्तरजातिः २८ उदाहरणांतरमाह शाब्द इति प्रभूगत इति शाब्दः
प्रचुराभिधायी प्रचुरवाची कीदृग्भवेत् इति हे शाब्दविदो वैयाकर
णा विचार्य कथयतेति पृष्टे ० प्रत्युत्तरं नास्ति कवर्गमध्यः नासि वर्गस्य पंच
वर्णात्मकस्य मध्या तृतीयो वर्णो गकारो यत्र सः प्रभूगत इत्यत्र गकारे प्रस्त
त इति शाब्दः प्रचुरार्थः प्रभूतं प्रचुरं प्राज्यमित्यमरः बृहस्पतिमते बौद्धसि
द्धांते विदिता नियोगे ज्ञाततत्वः पुमान्प्रायः कीदृशाः भवंति प्रत्युत्तरं

नास्तिकवर्गमध्य: नास्तिकानां वेदबाह्यानां वर्ग: समूहस्तत्रमध्य: मध्ये
स्थितइत्यर्थ: २८ पदांतरादिसंबंधात्प्रश्नवाक्येपिसंस्थितं कथिता
पक्रुति: सास्याल्लक्ष्यतेयत्रनोत्तरं २७ कथितापक्रुतेर्लक्षणमाह
पदांतरेति पदयोरंतरंपदांतरं आदिना॰ पादादौपदमध्येचपदांतेवा
य: संबंधस्तस्मात्सदपाक्येपिसंस्थितंवर्त्तमानमुत्तमंयत्रलक्ष्यतेसाज्ञा
सं ति: कथितापक्रुतिर्ज्ञास्यात् २८ पृथ्वीसंबोधनंकीदृक्कविनापरि
कीर्त्तितं केनेदंमोहितंविश्वंप्राय: केनाप्यतेयश: ३० अस्याद्यमु
दाहरणमाह पृथ्वीति कविनाविदुषापृथ्वीसंबोधनंकीदृक्परिकीर्त्तितं

इदं विश्वं भुवनं केन मोहितं प्रायो बाहुल्येन यथा कीर्ति केनाप्यते एतत्प्रश्नत्रया
णां क्रमशः पदांतरादि संबंधात्क विनेति पदेः न प्राप्नुत्तरां त्रयं वदंति कोऽइनाः
कविना ० एवं पद विभागे कृते को हे पृथ्वी ० इ ० कामयेन इनाऽः कॉमद मो
नोमारास्तिधानः कविना पंडितेन ० धीमान् सूरिः कृती कविरित्यमरः
३० कस्य मरोडुरधिगमः कमले कः कथयति विरंचितावासः कैस्तुष्यति
चामुण्डारिपवस्तेवं दस्कृतो ऽत्र दृष्टाः ३१ कथिता पकुतिज्ञातिः ३१ उदाह
रणांतरमाह कस्येति मरौ धन्वदेशे कस्य उदुरधिगमः दुःखेनाधिगम्यते इ
तिडुः त्वा भरितियावत् प्रत्युत्तरं ० कस्य ० कं जलं तस्य कमले कृतावासः

